॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला
१९०

महावैयाकरण-श्रीनागेशभट्टप्रणीता

# वैयाकरणसिद्धान्त-
# परमलघुमञ्जूषा

'किरणावली'-संस्कृतव्याख्योपेत-हिन्द्यनुवादसहिता

व्याख्याकारः
आचार्य लोकमणिदाहाल

चौखम्बा सुरभारती प्रकाशन
वाराणसी

THE
CHAUKHAMBA SURBHARATI GRANTHAMALA
190

VAIYĀKARAṆA-SIDDHĀNTA

# PARAMALAGHUMAÑJŪṢA

OF

## ŚRĪ NĀGEŚA BHAṬṬA

Edited with
'Kiranavali' Sanskrit Commentary and
Hindi Translation

By
Āchārya Lokmani Dāhāl

CHAUKHAMBA SURBHARATI PRAKASHAN
VARANASI

# विषयानुक्रमः


| | | पृष्ठाङ्कः |
|---|---|---|
| १. | शक्तिनिरूपणम् | १ |
| २. | लक्षणानिरूपणम् | ५८ |
| ३. | व्यञ्जनानिरूपणम् | ७७ |
| ४. | स्फोटनिरूपणम् | ८३ |
| ५. | आकाङ्क्षाविचारः | १०६ |
| ६. | योग्यताविचारः | ११२ |
| ७. | आसत्तिविचारः | ११५ |
| ८. | तात्पर्यविचारः | ११७ |
| ९. | धात्वर्थनिरूपणम् | १२० |
| १०. | निपातार्थनिर्णयः | १६८ |
| ११. | दशलकारादेशार्थनिर्णयः | २०६ |
| १२. | कारकनिरूपणम् | २५२ |
| १३. | नामार्थविचारः | २९१ |
| १४. | समासादिवृत्त्यर्थविचारः | ३०५ |

॥ श्रीः ॥

महावैयाकरण-श्रीमन्नागेशभट्टप्रणीता

# परमलघुमञ्जूषा

## आचार्यलोकमणिदाहालप्रणीत-
## 'किरणावली'-संस्कृत-हिन्दीव्याख्योपेता

---

## ( १ ) अथ शक्तिनिरूपणम्

### मङ्गलाचरणम्

( १ ) शिवं नत्वा हि नागेशेनानिन्द्या परमा लघुः ।
वैयाकरणसिद्धान्तमञ्जूषैषा विरच्यते ॥ १ ॥

### * किरणावली *

ध्यात्वा परं महान्तं लोकमणिरितीह पर्शुरामसुतः ।
नागेशभट्टविहितां व्याख्यातीह परमलघुमञ्जूषाम् ॥

**व्याख्या—शिवमित्यादि ।** अथ तत्रभवान् महावैयाकरणः स्वायत्तीकृतनिखिलप्रकरणः सुसमाराधितमहेशो नागेशः 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि हि प्रथन्ते वीरपुरुषाणि च भवन्ति आयुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युः' इति शिष्टोक्तिमनुसृत्य प्रारिप्सितग्रन्थनिष्प्रत्यूहपरिसमाप्तिकामनया ग्रन्थारम्भे कृतमभीष्टदेवताप्रणामात्मकं मङ्गलं शिष्यशिक्षायै निबध्नन् 'ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते । शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः' ॥ इति शिष्टवचनमनुसृत्य प्रेक्षावतां प्रवृत्तये प्रवृत्तिप्रयोजकज्ञानजनकज्ञानविषयत्वरूपं विषयप्रयोजनसम्बन्धाधिकार्यात्मकमनुबन्धचतुष्टयञ्च निरूपयति—**शिवमित्यादिना** । नागेशेन शिवं नत्वा एषा अनिन्द्या परमा लघुः वैयाकरणसिद्धान्तमञ्जूषा विरच्यत इत्यन्वयः । **नागेशेन** नागेशभट्टाख्येन शिवभट्टसुतेन सतीदेवीगर्भजेन विदुषा—'शिवभट्टसुतो धीमान् सतीदेव्यास्तु गर्भजः' इत्यन्यत्र कथनात् । मयेति शेषः । न च 'आत्म नाम गुरोर्नाम नामातिकृपणस्य च । श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः' ॥ इति शिष्टशासनान्नागेशेनेति स्वनामग्रहणं प्रत्यवायजनकन्तच्च मङ्गले न युक्तमिति वाच्यं ग्रहधातोस्तत्रोच्चारणार्थपरकत्वाल्लेखने निषेधाभावात् निषेधस्य वैखरीमात्रविषयत्वाद्वा प्रतिज्ञादौ स्वनामसङ्कीर्तने दोषाभावस्य शास्त्रान्तरेऽपि दर्शनाच्च न तस्य वैखरीविषयत्वेऽपि 'रामो द्विर्नाभिभाषते' इत्यादावापत्तिः । अस्मदर्थनामार्थयोरभेदसम्बन्धेन